# Samsaramohanam Ganeshakavacham

# સંસારમોહનં ગણેશકવચમ્

## Document Information

Text title : saMsAramohanagaNeshakavacham

File name : saMsAramohanagaNeshakavacham.itx

Category : ganesha, kavacha

Location : doc_ganesha

Description-comments : Verses 78-93 Brahmavaivartapurana adhyAya 13 gaNeshakhaNDa

Latest update : October 19, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# સંસારમોહનં ગણેશકવચમ્

શ્રીવિષ્ણુરુવાચ ।
સંસારમોહનસ્યાસ્ય કવચસ્ય પ્રજાપતિઃ ।
ઋષિશ્છન્દશ્ચ બૃહતી દેવો લમ્બોદરઃ સ્વયમ્ ॥ ૧॥
ધર્માર્થકામમોક્ષેષુ વિનિયોગઃ પ્રકીર્તિતઃ ।
સર્વેષાં કવચાનાન્ડ્ચ સારભૂતમિદં મુને ॥ ૨॥
ૐ ગં હું શ્રીં ગણેશાય સ્વાહા મે પાતુ મસ્તકમ્ ।
દ્વાત્રિંશદક્ષરો મન્ત્રો લલાટં મે સદાઽવતુ ॥ ૩॥
ૐ હ્રીં ક્લીં શ્રીં ગમિતિ ચ સન્તતં પાતુ લોચનમ્ ।
તાલુકં પાતુ વિઘ્નેશઃ સન્તતં ધરણીતલે ॥ ૪॥
ૐ હ્રીં શ્રીં ક્લીમિતિ સન્તતં પાતુ નાસિકામ્ ।
ૐ ગૌં ગં શૂર્પકર્ણાય સ્વાહા પાત્વધરં મમ ॥ ૫॥
દન્તાણિ તાલુકાં જિહ્વાં પાતુ મે ષોડશાક્ષરઃ ॥ ૬॥
ૐ લં શ્રીં લમ્બોદરાયેતિ સ્વાહા ગણ્ડં સદાઽવતુ ।
ૐ ક્લીં હ્રીં વિઘ્નનાશાય સ્વહા કર્ણં સદાઽવતુ ॥ ૭॥
ૐ શ્રીં ગં ગજાનનાયેતિ સ્વાહા સ્કન્ધં સદાઽવતુ ।
ૐ હ્રીં વિનાયકાયેતિ સ્વાહા પૃષ્ઠં સદાઽવતુ ॥ ૮॥
ૐ ક્લીં હ્રીમિતિ કઙ્કાલં પાતુ વક્ષઃસ્થલન્ડ્ચ ગમ્ ।
પાણૌ પાદૌ સદા પાતુ સર્વાઙ્ગં વિઘ્નનિઘ્નકૃત્ ॥ ૯॥   var  કરૌ પાદૌ

પ્રાચ્યાં લમ્બોદરઃ પાતુ આગ્નેય્યાં વિઘ્નનાયકઃ ।
દક્ષિણે પાતુ વિઘ્નેશો નૈરૃત્યાન્તુ ગજાનનઃ ॥ ૧૦॥
પશ્ચિમે પાર્વતીપુત્રો વાયવ્યાં શઙ્કરાત્મજઃ ।
કૃષ્ણસ્યાંશશ્ચોત્તરે તુ પરિપૂર્ણતમસ્ય ચ ॥ ૧૧॥
ઐશાન્યામેકદન્તશ્ચ હેરમ્બઃ પાતુ ચોર્દ્ધ્વતઃ ।
અધો ગણાધિપઃ પાતુ સર્વપૂજ્યશ્ચ સર્વતઃ ॥ ૧૨॥   var  ગણાધિપોઽપ્યધઃ

સ્વપ્ને જાગરણે ચૈવ પાતુ મે યોગિનાં ગુરુઃ ॥ ૧૩॥

ઇતિ તે કથિતં વત્સ ! સર્વમન્ત્રૌઘવિગ્રહમ્ ।
સંસારમોહનં નામ કવચં પરમાદ્ભુતમ્ ॥ ૧૪॥
શ્રીકૃષ્ણેન પુરા દત્તં ગોલોકે રાસમણ્ડલે ।
વૃન્દાવને વિનીતાય મહ્યં દિનકરાત્મજ ॥ ૧૫॥
મયા દત્તન્ડચ તુભ્યન્ડચ યસ્મૈ કસ્મૈ ન દાસ્યસિ ।
પરં વરં સર્વપૂજ્યં સર્વસઙ્કટતારણમ્ ॥ ૧૬॥
ગુરુમભ્યર્ચ્ય વિધિવત્ કવચં ધારયેત્તુ યઃ ।
કણ્ઠે વા દક્ષિણે બાહૌ સોઽપિ વિષ્ણુર્ન સંશયઃ ॥ ૧૭॥
અશ્વમેધસહસ્રાણિ વાજપેયશતાનિ ચ ।
ગ્રહેન્દ્રકવચસ્યાસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૧૮॥
ઇદં કવચમજ્ન્ડઆત્વા યો ભજેચ્છઙ્કરાત્મજમ્ ।
શતલક્ષપ્રજપ્તોઽપિ ન મન્ત્રઃ સિદ્ધિદાયકઃ ॥ ૧૯॥

ઇતિ બ્રહ્મવૈવર્તે ગણપતિખણ્ડે સંસારમોહનં નામ
ગણેશકવચં સમ્પૂર્ણમ્ ॥

Verses 78-93 Brahmavaivartapurana adhyAya 13 gaNeshakhaNDa.

*Samsaramohanam Ganeshakavacham*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*